"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

भल्लुकः, पुं, (भल्लूक+पृषोदरादित्वात् ह्रस्वः।) भालूकः। इत्यमरः॥

भल्लूकः, पुं, (भल्लते इति। भल्ल+"उलूकादयश्च।" उणा० ४। ४१। इति ऊकप्रत्ययेन साधुः।) जन्तुविशेषः। भालूक इति भाषा। तत्पर्य्यायः। ऋक्षः २ भल्लः ३ सशल्यः ४ दुर्घोषः ५ भल्लुकः ६ पृष्ठदृष्टिः ७ द्राविडः ८ दीर्घकेशः ९ चिरायुः १० दुश्चरः ११ दीर्घदर्शी १२। इति राजनिर्घण्टः॥ भालुकः १३ भालूकः १४ अच्छः १५ भाल्लूकः १६ भौलूकः १७। इति शब्दरत्नावली॥ (यथा, महाभारते। १२। ११६। ६।
"सिंहव्याघ्रगणाः क्रूरा मत्ताश्चैव महागजाः।
द्वीपिनः खड्गभल्लूका ये चान्ये भीम-
दर्शनाः॥"
कोशस्थप्राणिविशेषः। तद्यथा,—
"शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः को-
शस्थाः।" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
श्योनाकप्रभेदः। (यथास्य पर्य्यायः।
"श्योनाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः।
दीर्घवृन्तश्च कट्वङ्गो भल्लूकष्टुण्टुकोऽरलुः॥"
इति वैद्यकरत्नमाला॥)
कुक्कुरः। इति राजनिर्घण्टः॥

भवं, क्ली, (भवति भूयते वा। भू+अच् अप् वा।) भव्यम्। इति राजनिर्घण्टः॥ चालता। इति भाषा॥

भवः, पुं, (भूयते इति। भू+भावे अप्।) जन्म। (यथा, याज्ञवल्क्ये। ३। १६४।
"भवो जातिसहस्रेषु प्रियाप्रियविपर्य्ययः॥"
भवत्यस्मादिति। भू+अपादाने अप्। शिवः। इत्यमरः॥ यथा, शतपथब्राह्मणे। ६।१।३।१५।
"तमब्रवीद् भवोऽसीति तद्यदस्य तन्नामा-
करोत्पर्जन्यस्तद्रूपमभवत् पर्जन्यो वै भवः॥")
स च जलमूर्त्तिः। यथा,—
"भवाय जलमूर्त्तये नमः।"
इति पार्थिवशिवलिङ्गपूजाप्रयोगः॥
(भवति प्रभवत्यनेनेति। भू+अप्।) क्षेमः। (यथा, महाभारते। १। २२१। २८।
"को हि नाम भवेनार्थी साहसेन समाचरेत्॥"
भवति उत्पद्यतेऽस्मिन्निति। भू+आधारे अप्।) संसारः। (यथा, मार्कण्डेये। १९। ७।
"अनघस्त्वं तथैवेयं देवी सर्व्वभवारणिः॥")
सत्ता। प्राप्तिः। इति मेदिनी॥

भवकः, पुं, (भवतादिति। भू+वुन्।) आशीर्वाचकः। इति संक्षिप्तसारः॥

भवघस्मरः, पुं, (भवस्य वनस्य घस्मरः ध्वंसकारकः।) दावानलः। इति शब्दमाला॥

भवत्, त्रि, (भाति विद्यते इति। भा+डवतुप्रत्ययः।) युष्मदर्थम्। अत्र भाधातोर्डवतुप्रत्ययेन निष्पन्नम्। तस्य लिङ्गत्रये रूपम्। भवान् भवती भवत्। (यथा, मार्कण्डेये देवीमाहात्म्ये। ८५। ५।
"भवतां नाशयिष्यामि तत्क्षणात् परमापदः॥")
वर्त्तमानार्थम्। इति मेदिनी। ते, १३७॥ अत्र भूधातोः शतृप्रत्ययेन निष्पन्नम्। तस्य लिङ्गत्रये रूपं भवन् भवन्ती भवत्॥ (यथा, मनौ। १२। ९७।
"चातुर्व्वर्ण्यं त्रयो लोका चत्वारश्चाश्रमाः पृथक्।
भूतं भवद्भविष्यञ्च सर्व्वं वेदात् प्रसिध्यति॥")

भवती, स्त्री, (भवत्+ङीप्।) बाणभेदः। स तु विषाक्तः। इति शब्दरत्नावली॥ दीप्तिमती। यथा। वाल्मीकिकृतगङ्गास्तोत्रम्।
"स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं
प्रार्थये॥"

भवदारु, क्ली, (भवाख्यं भवप्रियं वा दारु।) देवदारुवृक्षः। इति राजनिर्घण्टः॥

भवदीयं, त्रि, (भवत्+"वतण्डकृक्षसौ।" ४।२। ११५। इति छस्।) भवत इदम्। युष्मत्सम्बन्धि। यथा, उद्भटे।
"श्रुत्वातिदूरे भवदीयकीर्त्तिं
कर्णौ च तुष्टौ न च चक्षुषी मे।
द्वयोर्विवादं परिहर्त्तुमिच्छन्
समागतोऽहं तव दर्शनाय॥"
(यथा, भागवते। ९। १८। ३९।
"वयसा भवदीयेन रंस्ये कतिपयाः समाः॥")

भवनं, क्ली, (भवत्यस्मिन्निति। भू+अधिकरणे ल्युट्।) गृहम्। (यथा, मनौ। ११। १८।
"स लब्ध्वा तं घटं प्राप्य प्रविश्य भवनं स्वकम्॥"
प्रासादः। यथा, महाभारते।३।५४।१३।
"देवराजस्य भवनं विविशाते सुपूजितौ॥"
भू+भावे ल्युट्।) भावः। इति मेदिनी॥ (यथा,
"ननु प्रागसतो घटस्य भवनं दृश्यते॥"
इति तार्किकाः॥)

भवनाशिनी, स्त्री, (भवं संसारं जन्मादिकं वा नाशयति उत्सारयति नाशयितुं शीलमस्येति वा। नश+णिच्+णिनिः।) सरयूनदी। इति पुराणम्॥

भवनीयं, त्रि, (भवितुमर्हमिति। भू+अनीयर।) भवितव्यम्। भव्यम्। उत्पत्त्यर्हम्। इति मुग्धबोधव्याकरणम्॥

भवन्तः, पुं, (भवत्यत्रेति। भू+"तॄभूवहिवसीति।" उणा० ३।१२८। इति झच्। स च षिद्भवति।) कालभेदः। स तु वर्त्तमानः। इत्युणादिकोषः॥ (भान्ति इति। भा+डवतु प्रत्ययः।) भवच्छब्दस्य प्रथमाबहुवचनान्तरूपोऽप्ययम्॥ (यथा, महाभारते। ३। ५४। २।
"के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः॥")

भवन्तिः, पुं, (भू+"सुवो झिच्।" उणा० ३। ५०। इति झिच्।) वर्त्तमानकालः। इत्युणादिकोषः संक्षिप्तसारोणादिवृत्तिश्च॥

भवभूतिः, पुं, (भवेन शिवेन भूतिरैश्वर्य्यादिकं यस्य भव एव भूतिर्यस्येति वा। शिवोपासनयैवास्य विद्याद्युत्पत्तेस्तथात्वम्।) कविविशेषः स च भोजराजस्य पण्डितः। मालतीमाधवादिनाटककर्त्ता च। तत्पर्य्यायः। भूगर्भः २। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्। ४। १४४।
"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः॥"
भवस्य महादेवस्य भूतिरिति विग्रहे तु।) महादेवस्य ऐश्वर्य्यञ्च॥

भवरुत्, [द्] स्त्री, (भवे जन्मादिप्रदे संसारे रोदिति अनेनेति भवे जन्मान्ते रोदित्यनेन वेति। रुद्+क्विप।) प्रेतपटहः। इति त्रिकाण्डशेषः॥

भवात्मजा, स्त्री, (भवस्य शिवस्य आत्मजेति।) मनसादेवी। इति शब्दमाला॥

भवादृक्, } [श्] त्रि, युष्मत्सदृशः। भवानिव
भवादृक्षः } दृश्यते य इति व्युत्पत्त्या भवच्छब्द-
भवादृशः } पूर्ब्बकदृशधातोः कर्म्मणि क्रमेण क्विप्-
टक्सक्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

भवानी, स्त्री, भवस्य भार्य्या। (भव+"इन्द्रवरुणभवशर्व्वेति।" ४। १। ४९। इति स्त्रियां ङीष् ततः आनुक् चागम इति।) दुर्गा। इत्यमरः।१।१।३१॥ एतन्नामकारणं यथा,—
"रुद्रो भवः समाख्यातो भवः संसारसागरः।
भवः कामस्तथा स्वष्टिर्भवानी परिकीर्त्तिता॥"
इति देवीपुराणे ४५ अध्यायः॥
(यथा, हरिवंशे भविष्यपर्व्वणि। १६। ६।
"भवानी तत्र मे देव! परित्यक्तुं तदाभवत्॥")।

भवानीगुरुः, पुं, (भवान्याः शिवपत्न्या गुरुः पिता।) हिमालयपर्व्वतः। इति हेमचन्द्रः॥

भवाभीष्टः, पुं, (भवे अभीष्टः।) गुग्गुलुः। इति राजनिर्घण्टः॥

भवाब्धिः, पुं, (भवः अब्धिरिवेत्युपमितसमासः। भव एव अब्धिर्वा।) संसाररूपसमुद्रः। यथा,
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः॥

भवायना, स्त्री, (भवः शिव एवायनमाश्रयस्थलमस्याः। शिवशिरसि स्थितत्वादस्यास्तथात्वम्।) गङ्गा। इति शब्दरत्नावली॥ (भवायनी-त्येके॥)

भविकं, क्ली, (भवः प्रभाव ऐश्वर्य्यादिकमित्यर्थः उत्पाद्यत्वेनास्त्यस्येति ठन्।) मङ्गलम्। तद्वति त्रि। इत्यमरः॥

भवितः, त्रि, (भवो मङ्गलं जातोऽस्येति तारकादित्वात् इतच्।) अतीतोत्पत्तिकः। भूतः। इति जटाधरः॥

भवितव्यं, त्रि, भवनीयम्। भव्यम्। इति भविष्यत्काले कर्म्मणि भावे शक्यार्हप्रैषाज्ञाप्राप्तकालार्थे च भूधातोस्तव्यप्रत्ययेन निष्पन्नम्। इति व्याकरणम्॥ यथा, वह्निपुराणे।